THE

MADRAS SANSKRIT READER SERIES

No II.

WITH GRAMMATICAL AND GLOSSARIAL NOTES

FOR

THE USE OF THE SECOND FORM

BY

N Swaminatha Sastri,

Second Assistant the Aryan High School Madras, and formerly Sanskrit Pandit Cuddalore College, etc etc

AND

N S Nataraja Sastri

MADRAS

G A NATESAN & Co PRINTERS, ESPLANADE

Price Six Annas] 1898 [Postage Extra

All Rights Reserved

PREFACE

It is well known that there are no easy prose works in Sanskrit literature suited to young students who are consequently compelled at the outset to read comparatively difficult books in poetry. Easy prose works are therefore a great want, and this want we propose to supply by a series of Readers called "The Madras Sanskrit Reader Series", which will contain easy passages in prose and poetry adapted to the requirements of beginners.

In the present volume the portion *Mitralâbha* of Hitopadesa, the easiest available prose work has been reproduced with an easy prose rendering of the stanzas which frequently occur in the book and which make it uninteresting and difficult to the students. In so doing we have retained the prose portion intact. We have also added a portion of *Râmòdanta* with a view to make the students familiar with Sanskrit poetry.

To help the students a few explanatory and grammatical notes have been appended.

TRIPLICANE, 6—9—98 } The Authors

॥ अथ हितोपदेशः ॥

— o —

॥ प्रस्तावना ॥

— o —

यन्नाभी सरसीरुहोदरजनिः स्त्रष्टामृडोयत्स्वसुः
भर्तायश्च विभुस्सताम् प्रतियुगंत्राणाययो भूतले ।
आविर्भावमुपैति यश्च जगतामन्तर्गतोयःपरः
सोऽस्मान् रक्षतु पार्थसारथि विभुर्बृन्दावनी मन्दिरः ॥

सिद्धिस्साध्ये सतामस्तु प्रसादात्तस्यधूर्जटेः ।
जाह्ववीफेन लेखेव यन्मूर्ध्नि शशिनः कला ॥

अस्ति भागीरथी तीरे पाटलीपुत्रनामधेयं नगरं । तत्र सर्व-स्वामिगुणेपेत स्सुदर्शनो नाम नरपतिरासीत् । स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव—

'अनेक संशयोच्छेदि परोक्षार्थस्य दर्शकम् ।

सर्वस्य लोचनं शास्त्रं यस्यनास्त्यन्धएवसः ॥

यौवन धनसम्पत्तिः प्रभुत्व मविवेकिता ।
एकैकमप्यनर्थाय किमुयत्र चतुष्टय ' ॥

इत्याकर्ण्यात्मनः पुत्राणामनधिगतशास्त्राणाम् नित्यमुन्मार्गगामिनाम् शास्त्राननुष्ठानेनोद्विग्नमनास्सराजा चिन्तयामास—

" अनधिगतशास्त्रेण पुत्रेण काणेन चक्षुषेव नकोप्यर्थः स्यात् । अजातमृतमूर्खेषु सकृद्दु.ख दायिनावजात मृतौ वरं, न तु सर्वदा दु·खदो मूर्ख. पुत्रः । लोके मृतस्सर्वोपि पुनर्जायते, अपि तु येन विदुपा कुलमुन्नीयते स एव जातः । अगुणिनमदातारम शुचिम विपश्चितञ्चपुत्र या प्रसूते सावन्ध्यैव । सपुत्रश्चैतस्या उच्चार एव । अनभिजातोपि गुणवान्नरः पुज्यते, निर्गुणस्तु शुद्धवशोपि धनुरिवनार्थकारी । नर आहार निद्रा भयैः पशुसमो जायते; ज्ञानेनैव विशिष्यते, ज्ञानहीनः पशुतुल्य एव भवति । केचिदेव वदन्ति—'आयुः, कर्म, विद्या, वित्तं निधनश्चेत्येतानिदेहिनो गर्भस्थस्यैव सृज्यन्ते । महतामपि यद् भवितव्यं तत्भवत्येव '

इति। एतत् कार्याक्षमाणाम् केषाञ्चिदालस्यवचनम्। कि तूद्योगे नैव सर्व साध्यं भवति। तद्दैवं निरस्यो द्योग एव करणीयः। उद्योगिनं पुरुषं लक्ष्मीस्स्वयमुपैति। अनुद्यमवतः कार्याणि न सिध्यन्ति। जन्मान्तरकृत कर्मैव दैवमिति कथ्यते। तत् पौरुषेण निवर्तनीयं। दैवमेव परमितिमत्वा यदियःकश्चित् गृहाद्बहिरलिन्द आसीत, तस्याभ्यवहराद्युद्योगंविनैव घटेतकि?। तस्मादुद्योग एव सर्वघटकः। तथा चाभिजननादि संपन्नोऽपि विद्या विहीन स्सभायाम् बक इव हंसमध्येनशोभते। तत् प्राज्ञः स्वात्मान मजरममरं मत्वा विद्या मर्थमिव साधयेत्। विद्याधनयोर्मध्ये विद्यैव गरीयसी। यतो विद्या केनापि नापहार्यते, व्ययेन वृद्धिमेवैति; धनन्तु चोरैरपह्रियते, व्ययेन क्षययाति। किञ्च। विद्ययैव सर्वेषां नृपस्नेहो भाग्यञ्च जायेते। अन्यच्च। विद्ययाविनयो भवति; विनयाद्योग्यताजायते; योग्यतया धनं वर्धते, धनात् सुखमुत्पद्यते"।

इत्यादि चिन्तयित्वा सराजा पण्डितसभां कारितवान्। राजोवाच 'भोः भोः पण्डिताः श्रूयताम्। अस्ति कश्चिदेवं भूतो विद्वान्यो ममपुत्राणां नित्यमुन्मार्गगामिनामनधिगत शास्त्राणा मिदा-

नीम् नीतिशास्त्रोपदेशेनपुनर्जन्म कारयितुं समर्थः?’ अत्रान्तरे विष्णुशर्मानाम महापण्डितो बृहस्पतिरिव सकलनीतिशास्त्र तत्वज्ञोऽब्रवीत्—‘देव, महाकुल सभूता एते राजपुत्राः। तन्मया-नीति ग्राहयितु शक्यन्ते। अतोऽहं षण्मा साभ्यन्तरे तवपुत्रान्नीति शास्त्राभिज्ञान् करिष्यामि’। राजा सविनयं पुनरुवाच—‘यथा काञ्चन सपर्कात् काचोमारकतीम् द्युति लभते, यथा कीटस्सुमन स्ससर्गेण महताम् शिर आरोहति, यथाऽश्मापि महद्भिः प्रति-ष्ठितोदेवत्वयाति, यथाचहीनवर्णोऽपि सत्सान्निध्येनदीप्यते, तथा भवत्सहवासेन मत्पुत्रा अपि अभिज्ञा भविष्यन्ति। तदेतेषा नीतिशास्त्रोपदेशाय भवन्त एव प्रमाणं’। इत्युक्त्वा तस्य विष्णु-शर्मणो बहुमान पुरस्सर पुत्रान् समर्पयामास।

। इति प्रस्तावना ।



॥ मित्रलाभ' ॥



अथ प्रसादपृष्ठे सुखोपविष्टानाम् राजपुत्राणाम् पुरस्तात् प्रस्तावक्रमेण सपण्डितोऽब्रवीत्—'धीमन्तः काव्यशास्त्राद्यालापेन काल यापयन्ति, मूर्खास्तुद्यूतादिना स्वापेन कलहेन वाकाल नयन्ति । तत्भवतां विनोदाय हितोपदेश नाम्नी काककूर्मदीनां विचित्रा कथां कथयामि' । राजपुत्रैरुक्त—'आर्य, कथ्यताम्' । विष्णुशर्मोवाच—'शृणुत । सप्रति मित्रलाभः प्रस्तूयते यस्याय माद्यः श्लोकः—

असाधना वित्तहीना बुद्धिमन्त स्सुहृत्तमा. ।
काकास्वकूर्म मृगवत् साधयन्त्यञ्जसाक्रियाम्' ॥

राजपुत्रा ऊचुः—'कथमेतत्' । विष्णुशर्मा कथयति—

अस्ति गोदावरीतीरे विशालः शाल्मली तरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणोनिवसन्ति । अथ कदाचिदवसन्नायां रात्रौ, अस्ताचलचूडावलंबिनि भगवति कुमुदिनी नायके चन्द्रमासि,

लघुपतनक नामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमायान्तं व्याधमपश्यत् । तमवलोक्याऽचिन्तयत्—'अद्य प्रातरेवानिष्ट-दर्शनं जात । नजानेकिमनभिमतं दर्शयिष्यानि' । इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः । अथ तेन व्याधेन तण्डुल-कणान्विकीर्य जाल विस्तीर्ण । स च प्रच्छन्नो भूत्वास्थितः । तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजस्सपरिवारो वियति विसर्प स्तां स्तण्डुलकणानवलोकयामास । ततः कपोतराजस्तण्डुल कणलुब्धान् कपोतान् प्रत्याह—'कुतोऽत्र निर्जनवने तण्डुल कणानां सभवः । तन्निरूप्यता तावत् । भद्रमिद न पश्यामि । प्रायेणानेन तण्डुलकणलोभेनाम्माभिरपि तथा भवितव्यम् ।

कंकणस्यतुलोभेन मग्नः पके सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तःपथिक स्समृतो यथा' ॥

कपोता ऊचुः—'कथमेतत्' । सोऽब्रवीत्—

॥ कथा १ ॥

अहमेकदा दक्षिणारण्ये चरन्नपश्यम् । एको वृद्धव्याघ्रः स्नातः

कुशहस्तः सरस्तीरे ब्रूते—'भो भोः पान्थाः, इदं सुवर्णकंकणं गृह्यतां'। ततो लोभाकृष्टेन केनचित् पान्थेनालोचितं—'भाग्ये नैतत् सभवति। किन्त्वस्मिन्नात्मसदेहे प्रवृत्तिर्नविधेया, यतो विष-संसृष्ट ममृतमपि मृत्यवे भवति। परतु सर्वत्रार्थार्जने प्रवृत्ति-स्सन्देह एव। लोकेऽनारूढ संशयो नभद्राणि पश्यति; आरूढ संशयस्तु, जीवति यदि, पश्यत्येव। तन्निरूपयामितावत्'।अथ स प्रकाश ब्रूते—'कुत्र तव कंकणं?' व्याघ्रोहस्त प्रसार्य दर्शयति। पान्थोऽवदत्—'कथं मारात्मकेत्वयि विश्वासः'। व्याघ्र उवाच— "शृणुरेपान्थ। प्रागेव यौवनदशाया मतिदुर्वृत्त आसम्। अनेक गो मानुषाणाम् वधान्मे पुत्रामृता दाराश्च। वशहीनश्चाहम्। ततः केनचित्धार्मिकेणाहमादिष्टः—'दानधर्मादिकं चरतुभवान्' इति। तदुपदेशादिदानी स्नानशीलोदाताच; वृद्धोगलितनखदंतश्चाहं नकथं विश्वास भूमिः। किच। अध्ययनं, नियमो, दानं, तपः, सत्यं, क्षमा, धृतिरलोभश्चेत्यष्टविधो धर्म मार्गः। तेषु प्रथमश्चतु-र्वर्गोदम्भार्थमपि स्यात्, उत्तरस्तुमहात्मनामेव भवति। मम चैतावान् लोभ विरहो येन हस्तस्थमपि सुवर्णककणं यस्मै कस्मै चिद् दातुमिच्छामि। तथापि 'व्याघ्रो मानुषं स्वादति' इति लोक प्रवादो दुर्निवारः, यतोलोको गतानुगतिकः। मयापि धर्मशास्त्राण्य

धीतानि। शृणु। किंचिद्वच्मि। यथा मरुकान्तारे वृष्टिस्सफला, तद्व द्दरिद्रे दान क्षुधार्ते भोजनचसफल। यथा स्वप्राणा स्वस्येष्टा तथा सर्वेषामपि। तस्मात्साधवः स्वसाम्येन भूतानिवीक्ष्य तेषुदया कुर्वते। यः परदारान्मातृवत् परद्रव्याणि लोष्ठवत् सर्वानात्मवच्च पश्यति स एव पण्डितः। अन्यच्च। 'व्याधितानौषधैरिव दारिद्रा-नार्जितुमशक्ताश्च धनैर्भर, ईश्वरायधन माप्रयच्छ' इति कृष्णः पार्थायोपदिदेश। त्व चातीव दुर्गतः, तेनैतत्तुभ्य दातु सयत्नोह। तदत्र सरसि स्नात्वा सुवर्णककणं गृहाण"। ततो यावदसौ तद्वचः प्रतीतोलोभात् सरःस्नातुप्रविशति तावन्महा पंके निमग्नः पलायितुमक्षमोऽभवत्। पके पतित दृष्ट्वा व्याघ्रोऽवदत्—'अ ह ह! महापके पातितोसि। अतस्त्वामहमुत्थापयामि'। इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः सपान्थोऽचितयत्—'लोके सर्वेपि स्वभावं विनानेतरान् गुणानाश्रयन्ति। दुरात्मानो धर्मशास्त्र पठ-न्ति वेदानधीयत इत्यतस्तान् नविश्वस्यात्। नदीषु नखिषु शस्त्रिषु शृङ्गिषु स्त्रीषु राजकुलेषुच न विश्वासः कर्तव्यः। इत्यादीनि पठतापि मया न भद्र कृत यदत्र मारात्मके विश्वासः कृतः'। इति चिन्तयन्नेवासौ व्याघ्रेण व्यपादितः खादितश्च। अतोह ब्रवीमि 'कंकणस्य तु लोभेन' इत्यादि।

अतस्सर्वथाऽविचारितं कर्म नकर्तव्यम् । यदि विचार्य क्रियते, दीर्घकालेपि विक्रियां नयाति। एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह 'आः! किमेवमुच्यते। वृद्धवचनमापत्स्वेव ग्राह्य। यदि सर्वत्र गृह्यते, भोजनेपि न प्रवृत्तिः स्यात् । लोकेऽन्नपानादिकं सर्वमपि शंकाक्रान्तमेव। तथा चेदभ्यवहारादौ कथं कदावाप्र वृत्तिः स्यात् । कथ वा जीवितव्यं । अतिशकितानां अति कुपितानां अतिदयालूनां अतीर्ष्यावतामल्यसन्तुष्टानां च सुख दूरत एव याति'। तत् श्रुत्वा सर्वेपि कपोतास्तत्रोपविष्टाः। विपत्तावापतन्त्या मधीतसर्वशास्त्रस्य सर्वसंशयच्छेत्तुर्विपश्चितोपि माया स्वर्णमृगलुब्धस्य रामस्येव धीर्मलिनी भवति हि। अनन्तर सर्वे जालेन बद्धा बभूवुः। ततो यस्य वचनात्तत्रा बलं बितास्तं सर्वेति रस्कुर्वन्ति। तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच—'नायमस्य दोषः। गोदोहकाले वत्सबन्धने गोजघेव विधेयोप्यापदे हेतुर्भवति। योविपन्नं आपद उद्धरते स एव मित्रं न तु तस्योपालंभकः। विपदि विस्मयः कापुरुषलक्षणम्। किञ्च। विपदि धैर्यमविषादश्च, संपदिशान्तिरहर्षश्च, युधिधैर्य विक्रमश्च, सदसि वाक्पाटवमित्येतानि महात्मनां प्रकृति सिद्धानि। तदत्र धैर्यमवलंब्यास्माभिः प्रतीकार श्चिन्त्यताम्। किंबहुना। अल्पसाराणामपि बहूनां सम-

2

वायः कार्यस्य साधकः। पश्य, तृणविहितोऽपि गुणः गजस्य बन्धने साधनं भवति। तदिदानीमस्माभिरप्येवक्रियतां। सर्वै-रेकचित्तीभूय जालमादायोड्डीयतां'। इति विचिन्त्य पक्षिणस्सर्वे जालमादायोत्पतिताः। अनन्तरं सव्याधः सुदूराज्जालापहारका स्तांनवलोक्य पश्चाद्धावन्नचिन्तयत्—'एकीभूय मम जालमपहरन्त एते यदाधःपतन्ति तदामद्वशमेष्यन्ति' इति। ततस्तेषु चक्षु-र्विषयातिक्रान्तेषु पाक्षिषु सव्याधोनिवृत्तः। अथ लुब्धक निवृत्त दृष्ट्वा कपोता ऊचुः—'किमिदानी कर्त्तुमुचित'। चित्रग्रीव उवाच—'माता पिता पुत्रो मित्र मित्येते प्रकृतिहिताः, अन्ये तु कार्यकारणतोहितकार्यकारिणः। तदस्माक प्रकृतिहितो हिरण्य-को नाम मूषिकराजो गण्डकी तीरे चित्रवने निवसति। सोऽ स्माकं पाशाश्छेत्स्यति'। इत्यालोच्य सर्वे हिरण्यक विवरसमीपं गताः। हिरण्यकश्च सर्वदाऽपायशंकया शतद्वारं विवर कृत्वा निवसति। ततो हिरण्यकः कपोताव पातभयाच्चकितः तूष्णीं स्थितः। चित्रग्रीव उवाच—'सखे हिरण्यक, किमस्मान्नसंभाषसे'। ततो हिरण्यकस्तद्वचन प्रत्यभिज्ञाय ससभ्रम बहिर्निसृत्याब्रवीत्—'आः! पुण्यवानस्मि। प्रियसुहृन्मे चित्रग्रीवस्समायातः'। पाशबद्धांश्चैतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वोवाच—'सखे, किमेतत्'। चित्र-

ग्रीवोऽवदत्—'सखे, अस्माक प्राक्तन जन्मकर्मणः फलमेतत्'। एतत् श्रुत्वा हिरण्यकः चित्रग्रीवस्य बन्धन छेत्तुं सत्वरमुपसर्पति। चित्रग्रीवोवक्ति—'मित्र, मामैव। अस्मदाश्रितानामेषा तावत् पाशान् प्रथमं छिन्धि। मम पाशान् पश्चात् छेत्स्यसि'। हिरण्यकोप्याह—'अहमल्पशक्तिः, दन्ताश्च मे कोमलाः। तदेतेषा पाशाश्छेत्तुं कथं समर्थः। तद्यावन्मेदन्तानत्रुट्यन्ति तावत्तवपाश छिनद्मि। तदनन्तर मेषामपि बधन यावच्छक्यं छेत्स्यामि'। चित्रग्रीव उवाच—'अस्त्वेवं। तथापि यथाशक्त्येतेषां बधनं खण्डय'। हिरण्यकेनोक्तं—"नीतिविद एवं वदन्ति—'आपदे धन रक्षेत्, धनेन दारान् रक्षेत्। अन्यच्च। पुरुषार्थ निदानभूतान् प्राणान् घ्नता पुरुषेण सर्व हतं; तान् रक्षता सर्व रक्षितमेव' इति। तदात्मपरित्यागेन यदाश्रितानां परिरक्षण तन्ननीतिविदां सम्मत"। चित्रग्रीव उवाच—'सखे, नीतिस्तावदीदृश्येव। किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथा न समर्थः। तेनेद ब्रवीमि—आश्रिता नवश्यं पालयेत्। तदर्थे प्राणधननाशोऽपि नचिन्त्यः। अपरश्चासाधारणो हेतुः। एकजातीना मेकगुणाना वर्तन विनापि ममान्तिकमत्यजतां एषामसंरक्षणे मत्प्रभुत्वस्य किवा फलं। तत् मत्प्राणनाशेनाप्येतान् मदाश्रितान् संजीवय' इति। एतदाकर्ण्य

हिरण्यकः प्रहृष्टमना पुलकितस्सन्नब्रीत्—'साधु मित्र, साधु । अनेनाश्रित वात्सल्येन त्रैलोक्यस्यापि प्रभुत्व त्वयि युज्यते'। एव मुक्त्वा तेन सर्वेषा बन्धनानिछिन्नानि । ततो हिरण्यकः सर्वान् सादरं सपूज्याह—'सखे चित्रग्रीव, सर्वथात्रजालवंधनविधौ दोषमाशक्यात्मन्यवज्ञानकर्तव्या । यतः समुद्रेऽगाधसलिलवासिनोऽपि मत्स्या हन्यन्ते, अतिबलिनो गजा अतिभयानकास्सर्पाश्च बध्यन्ते, अतिमेधावी पण्डितोऽपि दरिद्राति; तस्माद्विधिरेव बलवानिति मदभिप्रायः'। इति प्रबोध्यातिथ्यं कृत्वालिग्य च तेन सप्रेषित. चित्रग्रीवो यथेष्ट देशान् सपरिवारो ययौ । हिरण्यकोऽपि स्वविवरं प्रविष्ट. । अथ लघुपतनक नामा काकः सर्ववृत्तान्त दर्शी-साश्चर्यमिदमाह—'अहो हिरण्यक, श्लाघ्योऽसि । अतोऽहमपि त्वयासह मैत्रीमिच्छामि । अतोमा मैत्र्येणानुग्रहीतुमर्हसि'। एतत् श्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह—'क स्त्व'। सब्रूते—'लघुपतनक नामा वायसोऽहं'। हिरण्यको विहस्याह—'का त्वयासह मैत्री । लोकेसमयोर्योगोयुज्यते; आवांतु विषमौयतोऽहमन्नं भवान् भोक्ता । तत्

भक्ष्यभक्षकयो प्रीतिः विपत्तेरेव कारणं ।
सृगालात् पाशबद्धोसौमृगः काकेन रक्षितः' ॥

वायसोऽब्रवीत्—‘कथमेतत्’। हिरण्यकः कथयति—

॥ कथा २ ॥

—*—

अस्ति मगधदेशे चंपकवती नामारण्यानी। तस्या चिरान्महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टांगः केन चित् सृगालेनावलोकित.। त दृष्ट्वा सृगालोऽचिन्तयत्—‘आः, कथमेतन्मांस सुललितं भक्षयामि। भवतु। विश्वासन्तावदुत्पादयामि’। इत्यालोच्योपसृत्याब्रवीत्—मित्र, कुशलते’। मृगेणोक्तं—‘क स्त्व’। सब्रूते—‘क्षुद्रबुद्धिनामा जंबुकोऽह। अत्रारण्येबंधुहीनो मृतवन्निवसामि। इदानी त्वां मित्रमासाद्य पुनस्सबंधुर्जीवलोकं प्रविष्टोऽस्मि। अधुनातवानुचरेण मया सर्वथा भवितव्यं’। मृगेणोक्त—‘एवमस्तु’। ततः पश्चादस्तं गते सवितरि भगवति मरीचिमालिनि, तौ मृगस्य वासभूमि गतौ। तत्र चंपकवृक्ष शाखायां सुबुद्धि नामा काको मृगस्य चिरमित्रं निवसाति। तौ दृष्ट्वा काकोऽवदत्—‘सखे चित्राङ्ग, कोऽयं द्वितीयः’। मृगोब्रूते—‘जंबुकोयं। अस्मत्सख्यमिच्छन्नागतः’। काकोब्रूते—‘मित्र, अकस्मादागन्तुनासह मैत्री नयुक्ता। तथाचोक्तं—

अज्ञात कुलशीलस्य वासोदेयोनकस्य चित् ।
मार्जारस्यहिदोषेण हतो गृध्रोजरद्गव.' ॥

तावाहतुः—'कथमेतत्' । काकः कथयति ।

॥ कथा ३ ॥

—*—

अस्ति भागीरथी तीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटी वृक्षः । तस्य कोटरेदैवदुर्विपाकात् गलितनखनयनो जरद्गव नामा गृध्रः प्रतिवसाति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पाक्षिणः स्वाहारात् किंचित् किंचिदुद्धृत्य ददति । तेनासौ जीवति । अथ कदाचिद्दीर्घकर्ण नामा मार्जारः पक्षिशावकान् भक्षयितु तत्रागतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृत. । तत् श्रुत्वा जरद्गवेनोक्तं—'कोयमायाति' । दीर्घकर्णोगृध्रमवलोक्य सभयं मनस्य चिन्तयत्—'हा हतोऽस्मि। अधुनाऽस्य सन्निधाने पलायितुमक्षमः । आभयागमन बिभीयात्; आगतेतु भये यथो चितं कुर्यात्। तद्यत् भवितव्यं तद्भवतु तावत्। विश्वासमुत्पाद्यास्य समीपमुपगच्छामि' । इत्यालोच्योपसृत्याब्रवीत्—'आर्य, त्वामभि-

वादये'। गृध्रोऽवदत्—'क स्त्व'। सोऽवदत्—'मार्जारोऽहं'। गृध्रो ब्रूते—'दूरमपसर । नोचेद्धन्तव्योऽसिमया'। मार्जारोऽवदत्—'श्रूयतान्तावदस्मद्वचनं । ततोयद्यहं वध्यस्तदाहन्तव्य.'। गृध्रोऽवदत—'किंवदसि'। मार्जार उवाच—'लोके जातिमात्रेणैव न कश्चिद्धन्यते पूज्यतेवा । अपि तु व्यवहार परिज्ञानानन्तरमेव वध्यः पूज्योवा भवति'। गृध्रो ब्रूते—'ब्रूहि । किमर्थमागतोऽसि । सोऽवदत—'अहमत्र गङ्गातीरे नित्यस्नायी ब्रह्मचारी चान्द्रायणव्रतमाचरं स्तिष्ठामि । यूयं धर्मज्ञानरता विश्वासभूमय इति पक्षिणः सर्वे सर्वदाममाग्रे प्रस्तुवन्ति । अतो भवद्भ्यो विद्यावयो वृद्धभ्यो धर्मं श्रोतुमिहागतः । भवन्त श्चैतादृशा धर्मज्ञा यन्मामातिथि हन्तुमुद्यता, गृहस्थधर्मश्चैष'। गृहागतोऽतिथिररिरपि पूज्य एव, द्रुमः स्वच्छाया छेत्तुरुपसंहरते कि । यदिवाधनं नास्ति तदाप्रीतिवचसाप्यातिथिः पूज्य एव। योऽतिथिर्यस्य गृहात् भग्नाशोनि वर्तते स तस्य सुकृतमादाय निजदुष्कृत प्रयच्छति' इति । गृध्रोऽवदत्—'मार्जारोहि मांसरुचिः । पक्षिशावकाश्चात्र निवसन्ति । तेनाहमेवं ब्रवीमि'। तत् श्रुत्वा मार्जारो भूमि स्पृष्ट्वा कर्णौ स्पृशति । ब्रूते च—'मया धर्मशास्त्रं श्रुत्वा वीतरागेणेददुष्करं व्रतं चान्द्रायणमध्य वसित। परस्परं विवदमानानामपि धर्मशास्त्रणां

'अहिंसा परमोधर्मः' इत्यत्रैकमत्य। अहिंसारताक्षमावन्तश्च जनाः स्वर्गं लभन्ते। मृतमेनं धर्म एवानुव्रजति। अन्यत् सर्वन्तु शरीरेणसह नश्यति। तत् स्वेच्छया वनेषूत्पन्नेन शाकादिना पूरणीयस्यास्य दग्धोदरस्य कृते कोमहत् पातक कुर्वीत'। एवं विश्वास्य स मार्जार स्तरुकोटरेस्थित.। ततोदिवसेषु गच्छत्सुपक्षिशावकानाक्रम्यकोटरमानीय प्रत्यह खादति। येषामपत्यानि खादितानितैः शोकार्तैर्विलपद्भिरितस्ततोजिज्ञासासमारब्धा। तत्परिज्ञाय मार्जारः कोटरान्निस्सृत्य बहिः पलायितः। पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि। अनन्तरं त ऊचु.—'अनेनैव जरद्गवेनास्माक शावकाः खादिताः'। इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः। अतोह ब्रवीमि—'अज्ञातकुलशीलस्य' इत्यादि'।

इत्याकर्ण्य स जबुकः सकोपमाह—'मृगस्य प्रथमदर्शनादिने भवानप्यज्ञात कुलशील एव। तत्कथ भवता सहैतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते। अथवा विद्वज्जनराहित्येऽल्पमतेरपि श्लाघ्यतैव; एरण्डोऽपि पादपाभावे द्रुमो भवतिहि। किंच। असौ निजोवापरोवेति गणनात्वादृशस्य लघुचेतसो जायते। मादृश उदारचरितस्य

तु सर्वत्र समबुद्धिरेव । तत् यथाय मृगोममवधुस्तथा भवानपि’। मृगोऽब्रवीत्—‘किमनेनोत्तरोत्तरेण। सर्वै रेकत्न विस्त्रभालापैस्सुखिभिस्स्थीयता, यतो व्यवहारमन्तरानकोऽपिकस्य चिद्रिपुर्मित्रवा जायते’। काकेनोक्त—‘एवमस्तु’। अथ प्रातस्सर्वे यथाभिमतदेशगता·। एकदानिभृत सृगालोब्रूते—‘सखेऽस्मिन्वनैकदेशे सस्यपूर्णक्षेत्नमस्ति । तदहं त्वा नीत्वा दर्शयामि’। तथाकृतेसति, मृग प्रत्यह तत्र गत्वा सस्य खादति । अथ क्षेत्रपातिना तद्दृष्ट्वा पाशो योजितः। अनन्तर पुनरागतो मृग. पाशैर्बद्धोऽचिन्तयत्—‘कोमामितः कालपाशादिवव्याधपाशात्त्रातु मित्नादन्यस्समर्थ’। तत्रान्तरे जंबुकस्तत्नागत्योपस्थितोऽचिन्तयत्—‘फलिता तावदस्माक कपट प्रबंधेन मनोरथसिद्धिः । एतस्योत्कृत्यमानस्य मांसासृग्लिप्तान्य स्थीनि मयावश्य प्राप्तव्यानि । तानिबाहुल्येन भोजनानि भविष्यन्ति’। मृगस्त दृष्ट्वोल्लसितो ब्रूते—‘सखे, ऋणेषुयश्शुद्धस्स एव शुद्धः, क्षीणेष्वैश्वर्येषु या भार्या सैव भार्या, व्यसनेषु ये बाधवास्तएव बांधवा., य आपत्सुमित्नं स एव मित्रं। तस्माच्छिन्धितावन्ममबधन । सत्वरत्रायस्वमा’। जबुको मुहुर्मुहु पाशं विलोक्याचिन्तयत्—‘दृढस्तावदयवधः’। ब्रूते च—‘सखे, स्नायुनिर्मिता एते पाशाः। तदद्यभट्टारकवारे कथमेतान्

दन्तैः स्पृशामि। मित्र, यदि चित्तेनान्यथा मन्यसे, तत् प्रभाते यत्त्वयावक्तव्य तत् कर्तव्य'। इत्युक्त्वा तत्समीप आत्मान आच्छाद्यस्थित.। अनन्तर स काक प्रदोषकाले मृगमनागतमवलोक्य ततस्ततोऽन्विष्य तथाविध दृष्ट्वोवाच—'सखे, किमेतत्'। मृगेणोक्त—'अवधीरित सुहृद्वाक्यस्य फलमेतत्; सुहृद्वाक्यमशृण्वत आपत् सन्निदध्याद्धि'। काको ब्रूते—'सवञ्चकः क्कास्ते'। मृगेणोक्त—'मन्मासार्थी तिष्ठत्यत्रैवात्मानमपिधाय'। काको ब्रूते—'उक्तमेव मयापूर्व। नृशस एकान्तेन न विश्वसनीयः; गतायु सुहृद्वाक्य न शृणोति, य. परोक्षे कार्यहानि विधाय प्रत्यक्षे प्रिय वदति न स मित्र, सपयोमुखविष कुम्भेन तुल्यः' इति। ततः काको दीर्घ निश्वस्य प्रलपति—'अरे वञ्चक, कि त्वया पापकर्मणाकृत। कि वाऽनेनापराद्ध। भगवति वसुन्धरे, अनागसिशुद्धमतावुपकारिणि च मित्रेय· पाप समाचरति तमसत्यसधजन कथ वहासि। अथवेय दुर्जनाना स्थिति —मशका इव पूर्व पादयोः पतन्ति, अनन्तर पृष्ठ खादन्ति; कर्णे किमपि वदन्ति; अथ च्छिद्र प्रविशन्ति'। अथ प्रभाते क्षेत्रपतिर्लगुडहस्तः त प्रदेशमागच्छन् काकेनावलोकित.। तमालोक्य काकेनोक्त—'सखे मृग, त्वमात्मानं मृतवत् सदर्श्य वातेनोदर पूरयित्वापादांस्तब्धीकृत्य-

तिष्ठ। यदाहं शब्दं करोमि, तदा त्वमुत्थाय सत्वर पलायिष्यसे'। मृग-स्तथैव काकवचने स्थित·। तत. क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकित·। 'आ, सत्वर मृतोऽसि' इत्युक्त्वा मृग बंधनान्मोचयित्वा पाशान् ग्रहीतु सयत्नो बभूव। तत काक-शब्द श्रुत्वा मृगस्सत्वर मुत्थाय पलायित.। तमुद्दिश्य तेन क्षेत्र-पतिनाक्षिप्तेन लगुडेन सृगालोहत:। अतोऽह ब्रवीमि—'भक्ष्य भक्षकयो प्रीति.' इत्यादि॥—काक: पुनराह—'त्वयि भक्षि-तेनममाहार पुष्कल स्यात्। त्वयि जीवति तु चित्रग्रीव इवा पदि जीवेय। तिर्यञ्चोऽपि सन्तो विश्वसनीया एव। ते साधुत्वा-त्प्रकोपिता अपि न विक्रिया यान्ति'। हिरण्यको ब्रूते—'चपल-स्त्व। चपलेन सह सर्वथा स्नेहो न कर्तव्य। किंच। शत्रुपक्षो भवानस्माक। कदाचिदपि शत्रुर्नसधेय। विद्यावानपि दुर्जन मणिमण्डितस्सर्प इव भयकर एव। यश्शत्रुषु विरक्तासु भार्यासु च विश्वसिति तस्य जीवित तदन्तमेव'। लघुपतनकोब्रूते—'श्रुत मया सर्वं। शौर्यं, शौच, सुखदु खसाधारणत्व, दाक्षिण्य, त्याग:, अनुराग:, सत्यसन्धत्व चेति सप्तविधा: सुहृद्गुणा। एतै रुपेतो भवदन्य: कस्सुहृन्मया प्राप्तव्य:। अत एतावान्मम स· कल्प·। त्वया सह सौहृद्यमवश्य करणीयं, नोचेदनाहारेणात्मान

व्यापादयिष्यामि'। इत्यादि तद्वचनमाकर्ण्य हिरण्यको बहिर्निस्सृत्याह—'आप्यायितोऽहं भवतामनेन वचनामृतेन। किंच। भवद्वचन क्रमेण रहस्यभेदः, याञ्चा, निष्ठुरत्व, चपलचित्तता, क्रोधः, असत्यसधत्व, द्यूतमित्येतेषु सप्तसुमित्रदूषणेषु गुणेषु त्वय्येकोऽपि गुणोनलक्ष्यते। तव कथा योगेन पटुत्व सत्यवादित्व च बुध्येते। भवति दृष्टमात्र एव स्थिरचित्तत्वादिगुणाश्चावगम्यन्ते। तत् भवतुभवतोऽभिमत मेव'। इत्युक्त्वा हिरण्यको मैत्र्य विधाय भोजनविशेषैर्वायस सन्तोष्य विवर प्रविष्टः। वायसोऽपि स्वस्थानं गतः। ततः प्रभृतितयोरन्योन्याहार प्रदानेन कुशलप्रश्नैर्विस्त्रभालापैश्च कालोऽतिवर्तते। एकदा लघुपतनको हिरण्यकमाह—'सखे, कष्टतरलभ्याहारमिद स्थान परित्यज्य स्थानान्तर गन्तुमिच्छामि'। हिरण्यको ब्रूते—'मित्र, क्वगन्तव्य। स्थानान्तर समीक्ष्यैवकिल पूर्व स्थान त्यजेत्'। वायसोब्रूते—'अस्ति सु निरूपितस्थान'। हिरण्यकोऽवदत्—'किं तत्'। वायसोवक्ति—'अस्ति दण्डकारण्ये कर्पूर गौराभिधान सरः। तत्र चिरकालोपार्जितः प्रिय सुहृन्मे मथराभिधानः कच्छपो धार्मिकः प्रतिवसति। स च भोजनविशेषैर्मांसवर्धयिष्यति'। हिरण्यकोप्याह—"तत्किमत्रावस्थायमयाकर्तव्य। उक्तंहिः—'यत्र ऋणदाता, वैद्यः, श्रोत्रियः,

सजलानदीाच न सन्ति, यत्र वृत्तिर्नघठते, यत्र मित्राणि बाधवाश्च न सन्ति; यत्र च विद्यार्जनोपायो नास्ति, तं देश दूरतः परिवर्जयेत् ' इति । ततो मामपि तत्रनय" । अथ वायसस्तत्र तेन मित्रेणसह विचित्रालापै स्सुखेन तस्य सरसस्समीप ययौ । ततो मथरोदूरादवलोक्य लघुपतनकस्य यथोचितमातिथ्य विधाय 'सर्वस्याभ्यागतो गुरु' इत्युक्तरीत्या मूषिकस्याप्यातिथि सत्कारं चकार । वायसोऽवदत्—'सखे मथर, सविशेषपूजामस्मै विधेहि, यतोऽय पुण्यकर्मणा धुरीणः कारुण्यरत्नाकरो हिरण्यकनामामूषिकराजः । एतस्य गुणस्तुति जिह्वासहस्रद्वयेनापि सर्पराजो न कदाचित् कथयितु समर्थस्स्यात्' । इत्युक्त्वा चित्रग्रीवोपाख्यान वर्णितवान् । मथरस्सादर हिरण्यक सपूज्याह—'भद्र, आत्मनो निर्जनवनागमनकारण माख्यातु मर्हसि' । हिरण्यकोऽवदत्—'कथयामि । श्रूयता' ।

॥ कथा ४ ॥

—:*:—

अस्ति चपकाभिधानाया नगर्या परिव्राजकावसथः । तत्र चूडाकर्णोनाम परिव्राट् प्रतिवसति । स च भोजनावशिष्ट भिक्षान्न

सहित भिक्षापात्र नागदन्तकेऽवस्थाप्यस्वपिति । अहञ्च तदन्न मुत्प्लुत्य प्रत्यह भक्षयामि । अनन्तर तस्य प्रियसुहृत् वीणाकर्णो नाम परिव्राजकस्समायात । तेनसह कथाप्रसङ्गावस्थितो मम त्रासार्थ जर्जरवशखण्डेन चूडाकर्णो भूमिमताडयत् । वीणाकर्ण उवाच—'सखे, किमिति ममकथा विरक्तोऽन्यासक्तो भवान् । चूडाकर्णेनोक्त—'मित्र, नाह विरक्त । किंतु पश्याय मूषिको ममापकारी सदापात्रस्थ भिक्षान्न मुत्प्लुत्य भक्षयति' । वीणाकर्णो नागदन्तक विलोक्याह—'कथ मूषिक. स्वल्पबलोप्येतावद्दूर-मुत्पतति । तदत्र केनाऽपिकारणेन भवितव्य । तथाचोक्त .—

अकस्माद्युवतीवृद्ध केशेष्वा कृष्यचुबति ।
पतिनिर्दयमालिग्य हेतुरत्रभविष्यति' ॥

चूडाकर्णः पृच्छति—'कथमेतत्' । वीणाकर्ण· कथयति ।

॥ कथा ९ ॥

—*·—

अस्ति गौडीये कौशांबीनाम नगरी । तस्या चन्दनदासोनाम वणिङ्महाधनो निवसति । तेन पश्चिमेवयसि वर्नमानेन कामाधि-

ष्ठित चेतसाधनदर्पाल्लीलावतीनाम वणिक्पुत्री परिणीता । साच-मकरकेतो विजयवैजयन्तीव यौवनवती बभूव । स च वृद्धपति-स्तस्यास्सन्तोपायनाभवत् । तथाऽपि स तस्यामतीवानुरागवान् । अथ सालीलावती यौवनदर्पादतिक्रान्त कुलमर्यादा कस्मिंश्चिदपि वणिक्पुत्रेऽनुरागवती बभूव । एकदासालीलावती रत्नावलीकिरण कर्बुरे पर्यंके तेन वणिक्पुत्रेणसह विस्त्रभालापै स्सुखासीना तमलक्षितोपस्थित पतिमवलोक्य सहसोत्थायकेशेष्वा कृष्यगाढ-मालिग्य चुबितवती । तेनावसरेण जारश्चपलायित. । अतोऽह ब्रवीमि—'अकस्माद्युवतीवृद्ध' इत्यादि ॥

मूषिकबलोपस्तभेन केनाऽपिकारणोनात्र भवितव्य । क्षण वि-चिन्त्यपरिव्राजकेनोक्त—'कारणचात्रधनबाहुल्यमेव भविष्यति' । ततः खनित्रमादाय तेन विवरं खनित्वा चिरसचित मम धनं गृ-हीत । ततः प्रभृति निजशक्तिहीन. स्वाहारमप्युत्पादायितुमक्षमः सत्रास मन्दम्मन्दमुपसर्प श्चूडाकर्णेनावलोकित. । ततस्तेनोक्तं—'लोके जनोऽर्थेनैव बलवान् भवति । अर्थशून्यस्य क्रियास्सर्वा-नष्टा भवन्ति । यस्यार्थस्स एव पुमान्, स एव पण्डितः । यस्यनार्थ स्तस्य न मित्राणि बाधवा वा । अर्थवियुक्तः पुरुष अन्य एव

भवति । पश्यैन स्वजाति समतागत पाप मूषिक' इति । एतत् सर्वमाकर्ण्य मयालोचितं—'ममात्रावस्थानमयुक्तमिदानी । यच्चान्यस्मा एतद्वृत्तान्तकथन तदपिलाघवहेतुत्वादनुचित । मनस्वी कुसुमस्तबक इव सर्वेषा मूर्ध्निवातिष्ठेद्वनेवाऽवशीर्येत । यच्चात्रैवयाञ्चयाजीवन तदप्यतीव गार्हित । विभवपरिभ्रष्ट दृष्ट्वानकेऽप्युपचरन्ति । किञ्च । दारिद्र्यह्रीहेतु', ह्रीमान्निस्सत्वो भवति, सत्वरहित: परिभूयते, परिभवाच्छोकोजायते; शुचाबुद्धिर्विनश्यति, बुद्धिनाशात्क्षयमेति, तस्मान्निर्धन' सर्वापदामास्पद भवति । तत् किमह परपिण्डेनात्मान पोषयामि । कष्ट भो., तदपि द्वितीय मृत्युद्वार । किंचित् ज्ञत्व, वेश्या सङ्गमः, परान्नभोजन मित्येतानि त्रीणि पुसां परिहासास्पदहि' । इत्यालोच्यापिलोभात्पुनरप्यर्थं ग्रहीतु ग्रहमकरव । ततोह मन्दम्मन्दमुपसर्प स्तेन वीणाकर्णेन जर्जरवशखण्डेन ताडितश्चाचिन्तय—'धनलुब्धस्य सर्वदा आपद एव स्युः ; सतुष्टस्य तु सर्वाः सपत्तयस्स्यु' । तदत्रावस्थोचित कार्य परिच्छेदः श्रेयान् । आपत्स्वापन्नासु परिच्छेद एव पाण्डित्य । ये परिच्छेद न कुर्वते तेषा शश्वद्विपदो भवेयुः । बन्धुजनमध्ये धनहीनजीवनात् वल्कल परिधायफलजलानि भुक्त्वा द्रुमाधस्तृणेषु शायित्वा व्याघ्रादि सेविते वने वासोवर' । इत्योलाच्य निर्जनवनमागतः । ततोऽस्मत्

पुण्योदयादनेन मित्रेणाहं स्नेहानुवृत्यानुगृहीतः। अधुनाच पुण्यपरं परया भवदाश्रयस्स्वर्ग एव मया प्राप्तः । मथर उवाच—'युष्मा भिरातिसंचयः कृतः । तस्यायंदोषः । शृणु । निजसौख्य निरुध्यार्जित धनं योरक्षति सपरार्थ भारवाहीगर्दभ इव क्लिश्यति। किञ्च । बन्धुमित्रैस्सहोपभोगरहितेनाधोभूमौ खात्वा निक्षिप्तेन धनेन जनायदिधनिनस्स्युस्तेनैव धनेन कथं वयमेव धनिनो न भवेम । उक्तच—

कर्तव्य स्सचयो नित्यं कर्तव्यो नाति संचयः ।
पश्य संचयशीलोऽसौ धनुषा जबुकोहतः' ॥

तावाहतु·—'कथमेतत्' । मंथरः कथयति ।—

॥ कथा ६ ॥

—*—

आसीत् कल्याणकटकवास्तव्यो भैरवो नाम व्याधः। सचैकदा मृगमन्विष्यमाणोविंध्याटवी गतवान्। ततस्तेन व्यापादितं मृगमादायगच्छता घोराकृतिस्सूकरोदृष्टः । तेन व्याधेन मृगं भूमौ निधायसूकरश्शरेणाहतः । सूकरेणाऽपि घनघोरगर्जनं कृत्वा स

व्याधो मुष्कदेशेहतस्सञ्छिन्नद्रुम इव भूमौ निपपात। अथ तयोः पादास्फालनेन समीप गतस्सर्पोऽपि मृत। अथानन्तरं दीर्घरावो नाम जम्बुकः परिभ्रमन्नाहारार्थी तान्मृतान्मृगव्याध सर्पसूकरानपश्यत्। अचिन्तयच्च—'अहो, अद्यमहद्भोज्य मे समुपस्थित। अथवा देहिनो दुःखानीव सुखान्यपि दैववशादकस्मादेवायान्तीति मन्ये। तद्भवतु। नरमासेनैक मास, मृगसूकरयोर्मासेन द्वौ मासौ, अहिनैक दिनञ्चनयेय। एवमेषा मासैर्मासत्रयमहएकच मे सुखेनगमिष्यति। इदानी तु धनुर्गुणो भक्षयितव्य.' इति निश्चिचाय। ततः 'प्रथमबुभुक्षायामिद निस्स्वादुकोदण्डलग्न स्नायुबन्धन खादामि' इत्युक्त्वा तथाकृतेसति, छिन्ने स्नायुबन्धने, उत्पतितेन धनुषाहृदिनिर्भिन्नस्सदीर्घरावः पञ्चत्व गतः। अतोऽह ब्रवीमि—'कर्तव्यस्सचयोनित्यं' इत्यादि।

"तथाचादातुरनुपभोक्तुश्चधन इतरे अनुभविष्यन्ति। तस्मात्त्वमननुभूयधनमितरार्थमरक्षः। यातुकाम। किमिदानीमतिक्रान्तोपवर्णनेन। पण्डिता गत नानुशोचन्ति। अप्राप्यंच नाभिवाञ्छन्ति। तत्सखे, सर्वदात्वयासोत्साहेन भवितव्य। शास्त्राध्ययन मात्रेण लोके जनोनविद्वान् भवति। किन्तु यश्शास्त्रमधीत्य क्रियावाश्च

भवति स एव विद्वान् । नामग्रहणमात्रेण चिन्तितमात्रेणवा औषधं प्राणिनमरोगं करिष्यति कि । किञ्च । हस्तगतः प्रदीपोऽधस्य यथा प्रकाशाय नाल भवति, तथा ध्यवसाय शून्यस्य ज्ञानं गुणाय न भवति । तदत्र सखे, दशा विशेषे शान्ति. करणीया । एतदप्यति कष्ट त्वया नमन्तव्य । इतरच्च । 'नखा, दन्ता', केशा,, पयोधरा, मन्त्रिण', कुलवध्वो, राजानश्च निजस्थानात् भ्रष्टाश्चेन्न शोभन्ते । इति विज्ञायमतिमान् स्वस्यस्थान न परित्यजेत्' । इत्येतत् कापुरुषवचन । सन्तोगजा इव सिह्मा इव च स्वस्थानमुत्सृज्य गच्छन्ति जीवन्तिच । दुर्जनास्तु काका इव, जीवनं घटेतवानवा, तत्रैव निधनं यान्ति । तस्मान्मनस्विनः कोवा स्वदेशः कोवा विदेश. । य देश गच्छन्ति तत्रैव स्वबुद्धिबलाभ्यामार्जित्य जीवन्ति । इतरच्च । सुखदु.खे सपदापदौ च न नियते, अपितु चक्रवद्भ्रमतः । कृतज्ञं, दृढचित्त, मदीर्घसूत्र, मुत्साहवन्तंच जन लक्ष्मीर्निवासार्थ स्वयमेवायाति । वीरो विद्वांश्चार्थैर्विनाऽपि सर्वत्र बहुमान यातः, कृपणस्त्वर्थवानपि परिभवमेव गच्छति । अपिश्वाभूषणाद्यलकृतोऽपि स्वभावोत्पन्नां सैह्मी द्युति लभते । परंच । धनानि, यौवनानि, योषितश्चा भ्रच्छायेव नदीर्घकालोप भोग्यानि । प्राणभृतां मृत्योरिव धनिनां चोरात्स्वजनाच्च सर्वदा-

भयमस्त्येव । तत् भ्रात., आशाया येदासास्ते सर्वेषा लोकाना दासाः; येषान्त्वाशादासी तेषा सर्वेऽपि लोकादासाः । किंबहुना । ममपक्षपातेन मयैवसहात्रकालोनीयता" । इति श्रुत्वा लघुपतनको ब्रूते—'धन्योसिमथर । सर्वश्लाघ्य गुणोऽसि । सतांप्रणय आमरण न नश्यति। कोपस्तु तत्क्षणमेव नश्यति। यथा पंकनिमग्नाना गजानां गजा एव उद्धरणक्षमाः, एव सन्त एव सतामापदुद्धरणधुर धराः'। तत एवन्ते स्वेच्छाहार विहारं कुर्वाणा स्सन्तुष्टास्सुख निवसन्ति । अथ कदाचिच्चित्रांगनामा मृगः केनापि त्रासित स्तत्रागत्यमिलितः। तत· पश्चादायान्तं मृगमवलोक्य भयं सचिन्त्य मथरो जल प्रविष्ट. ।

मूषिकश्च विवर गतः। काकोप्युड्डीय वृक्षमारूढः। ततो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्नकोप्यायातीत्यालोचित । पश्चात्तद्वचनादागत्यपुनस्सर्वे मिलित्वा तत्रैवोपविष्टाः । मंथरेणोक्तं —'भद्र मृग, स्वागतं। स्वेच्छयोदकाद्याहारोऽनुभूयतां। अत्रावस्थानेन वनमिदं सनाथी क्रियतां'। चित्रांगो ब्रूते—'लुब्धकत्रासितोऽहं भवतां शरणमागत. । भवद्भिस्सह सख्यमिच्छामि'। हिरण्यकोऽवदत्—'मित्रत्व तावदस्माभिस्सह भवताऽयत्नेन

मिलित । तदत्रभवतास्वगृहानिर्विशेषं स्थीयतां’ । तच्छ्रूत्वा मृगस्सानन्दो भूत्वा स्वेच्छाहारं कृत्वा पानीय पीत्वा जलासन्नतरुच्छायायामुपविष्ट. । अथ मथरेणोक्त—‘सखे मृग, एतस्मिन्निर्जने वने केनत्रासितोऽसि । कदाचित् कि व्याधास्सञ्चरन्ति’ । मृगेणोक्त—अस्ति कलिंगविपये रुक्माङ्गदोनाम नरपतिः । सच दिग्विजय व्यापारक्रमेणागत्य चन्द्रभागानदीतीरे समावासित कटको वर्तते । प्रातश्च तेनात्रागत्य कर्पूरसरस्समीपे भवितव्यमिति व्याधानां मुखात् किवदन्ती श्रूयते । तदत्राऽपि प्रातरवस्थानं भय हेतुकमित्यालोच्य यथा वसरकार्य मारभ्यतां’ । तच्छ्रुत्वा कूर्म स्सभयमाह—‘जलाशयान्तर गच्छामि’ । काकमृगावुक्तवन्तौ—‘एवमस्तु’ । ततो हिरण्यको विहस्याह—‘जलाशयान्तरे प्राप्ते, मन्थरस्यकुशलं । स्थले गच्छतः क. प्रतीकारः । सखे लघुपतनक, अनेनोपदेशेन तथा भवितव्य ।

स्वयं वीक्ष्ययथावध्वापीडितं कुचकुट्मल ।
वणिक् पुत्रोऽभवद्दुःखी त्वं तथैवभाविष्यासि’ ॥

तऊचुः—‘कथमेतत्’ । हिरण्यकः कथयति ।—

॥ कथा ७ ॥

—*—

अस्ति कान्यकुब्जविषये वीरसेनोनामराजा। तेन वीरपुरनाम्नि नगरे तुङ्गबलोनाम राजपुत्रो भोगपति कृतः। सचमहाधनस्तरुण एकदा स्वनगरे भ्राम्यन्नाति प्रौढयौवना लावण्यवतीनाम वणिक्-पुत्रवधूमालोकयामास। ततस्स्वहर्म्यं गत्वा स्मराकुलमति स्तस्याः कृते दूती प्रेषितवान्। सापि लावण्यवती तदवलोकनक्षणात्प्रभृति स्मरशरप्रहार जर्जरितहृदया तदेक चित्ताऽभवत्। अथ दूतीवचन श्रुत्वा लावण्यवत्युवाच—'अह पतिव्रता। कथमेतस्मिन्नधर्मे पति लंघने प्रवर्ते। ततो यद्यदादिशति मे प्राणेश्वर स्तदेवाहमविचा-रित करोमि'। दूत्योक्त—'अपि सत्यमेतत्'। लावण्यवत्युवाच —'ध्रुव सत्यमेतत्'। ततो दूतिकयागत्वा तत्तत्सर्व तुङ्गबलस्याग्रे निवेदित। तच्छ्रुत्वा तुङ्गबलोऽब्रवीत्—'स्वामिनानीयसमर्पयि-तव्येति कथमेतच्छक्य'। कुट्टिन्याह—'उपाय· क्रियता। तथाचोक्त।—

उपायेनहियच्छक्य नतच्छक्यं पराक्रमैः।
सृगालेन हतोहस्ती गच्छता पङ्कवर्त्मना'॥

राजपुत्रः पृच्छति—'कथमेतत्'। सा कथयति।—

॥ कथा ८ ॥

अस्ति ब्रह्मारण्ये कर्पूरतिलकोनाम हस्ती । तमवलोक्य सर्वे सृगालाश्चिन्तयन्तिस्म—'यद्ययं केनाप्युपायेन म्रियते, तदास्माक मेतद्देहेन मासचतुष्टयस्य भोजनं भविष्यति'। तत्रैकेन वृद्ध सृगालेन प्रतिज्ञात—'मया बुद्धिप्रभावादस्य मरण साधयितव्यं'। अनन्तर सवञ्चक· कर्पूरतिलकसमीप गत्वा साष्टाङ्गपातंप्रणम्योवाच—'देव, दृष्टिप्रसाद कुरु'। हस्तीब्रूते—'कस्त्व। कुतस्समायातः'। सोऽवदत्—'जम्बुकोऽह। सर्वैर्वनवासिभिः पशुभिर्मिलित्वा भवत्सकाशं प्रस्थापितः। यद्विनाराज्ञाऽवस्थातुं नयुक्त तदत्राटवी राज्ये भिषेक्तु भवान् सर्वस्वामिगुणोपेतो निरूपित.। तद्यथा लग्नवेला नचलति तथा कृत्वा सत्वरमागम्यतां देवेन'। इत्युक्त्वोत्थाय चलितः। ततोऽसौराज्यलोभाकृष्टः कर्पूरतिलकस्सृगालवर्त्मना धावन्महापके निपातितः। ततस्तेन हस्तिनोक्त—'सखे सृगाल, किमधुनाविधेय। पंके निपतितोह म्रिये। परावृत्य पश्य'। सृगालेन विहस्योक्त—'देव मम पुच्छकावलबन कृत्वोत्तिष्ठ। यन्मद्विधस्य वचासि त्वया प्रत्ययः कृतस्तदनुभूयता मशरणं दुःखं'। ततो महापके निमग्नो हस्ती सृगालैर्भक्षितः। अतोऽहं ब्रवीमि—'उपायेनहियच्छक्य' इत्यादि।

ततः कुट्टिन्युपदेशेन त चारुदत्तनामानं वणिक् पुत्र स राजपुत्रस्सेवकचकार। ततोऽसौ तेन सर्वविश्वास कार्येषु नियोजितः। एकदा तेन राजपुत्रेण स्नातानुलिप्तेन कनकरत्नालकार धारिणा प्रोक्त— 'अद्यारभ्यमासमेकं गौरीव्रत कर्त्तव्यं। तदत्र प्रतिरात्रमेकांकुलीना युवतीमानीय समर्पय। सामयायथोचितेन विधिना पूजयितव्या'। ततस्सचारुदत्तस्तथाविधांनवयुवतीमानीय समर्पयति। पश्चात् प्रच्छन्नस्सन् किमयं करोतीति निरूपयति। सच तुङ्गबलस्तायुवतीमस्पृशन्नेव दूराद्वस्त्रालङ्कारगन्धचन्दनैस्सपूज्य रक्षकं दत्वा प्रस्थापयतिं। अथ वणिक्पुत्रेण तद्दृष्ट्वोपजात विश्वासेन लोभाकृष्टमनसास्ववधूर्लावण्यवती समानीय समर्पिता। सच तुङ्गबलस्ता हृदयप्रियां लावण्यवती विज्ञाय ससभ्रममुत्थाय निर्भरमालिग्य निमीलिताक्षः पर्यंके तयासह विललास। तदालोक्य वणिक् पुत्रश्चित्रलिखित इवेतिकर्त्तव्यतामूढः परं विषादमुपगतः। अतोऽहं ब्रवीमि—'स्वयं वीक्ष्य' इत्यादि।

तद्धितवचनमवधीर्य महताभयेन विमुग्ध इव त जलाशयमुत्सृज्य मंथरश्चलितः। तेऽपिहिरण्यकादयः स्नेहादनिष्टमाशङ्कमाना मंथरमनुगच्छन्ति। ततः स्थले गच्छन् केनापि व्याधेन

काननं पर्यटता मथरः प्राप्तः । प्राप्यत गृहीत्वोत्थाय धनुपिबद्धा भ्रमन् क्लेशात् क्षुत्पिपासाकुल. स्वगृहाभिमुख चलित । अथ मृग वायस मूषिकाः परं विषाद गच्छन्तश्तमनुजग्मु । ततो हिरण्यको विलपति—'एकस्य दुःखार्णवस्य पारमप्राप्नुवत एव ममापर श्शोकाब्धिरासन्नः। पुसा सहजे मित्रे यावती प्रीतिस्तावतीनमातारि, पितरि, सोदर्ये, पुत्रे, भार्याया वा जायते। कदाकथवा मान्मित्रमापदो निवर्तेत । समृद्धिकाले द्रव्याभिलापयामिलन्त अनेकेसुहृदस्सन्ति परन्तु यस्सुखदुःखयोस्सह भवति तादृक् सुहृद्दुर्लभ. । सुहृदां तत्वनिकषग्रावाविपदेव'। इति बहुविलप्य हिरण्यकश्चित्राङ्ग लवुपतनकावाह—'यावदयव्याधो वनान्ननिस्सरति तावन्मथरं मोचयितु यत्न. क्रियता'। तावूचतुः—'सत्वर कार्यमुच्यता'। हिरण्यको ब्रूते—'चित्राङ्गो जलसमीपं गत्वा मृतमिवात्मान दर्शयतु । काकश्चतस्यो परिस्थित्वाचञ्च्वा किमपिलिखतु । नूनमनेनलुब्धकेन तत्र कच्छप परित्यज्य मृगमासार्थिना सत्वरं गन्तव्य । ततोऽह मन्धरस्य बन्धन छेत्स्यामि । सन्निहिते लुब्धके भवद्भ्या पलायितव्य'। चित्राङ्गलवुपतनकाभ्या शीघ्र गत्वा तथाऽनुष्ठिते सति, सव्याधश्श्रान्तः पानीय पीत्वा तरोरधस्तादुपविष्ट स्तथा विध मृगमपश्यत् । ततः कर्तरिकामादाय प्रहृष्टमना मृगान्तिक

चलित । तत्रान्तरे हिरण्यकेनागत्य मन्थरस्य बन्धन च्छिन्न । स कूर्मस्सत्वर जलाशय प्रविवेश । स मृग आसन्न त व्याध विलोक्योत्थाय पलायित· । प्रत्यावृत्य लुब्धको यावत्तरुतलमायाति तावत् कूर्ममपश्यन्नचिन्तयत्—'उचितमेवैतन्ममासमीक्ष्यकारिणः, योहकरस्थ ध्रुव त्यक्त्वा दूरस्थस्याध्रुवस्य सपादनार्थ प्रयत्नमकरव' ततोऽसौस्वकर्म वशान्निराश कटक प्रविष्ट । मन्थरादयस्सर्वे मुक्तापदस्स्वस्थान गत्वा यथा सुखमास्थिता· । अतोह ब्रवीमि— 'असाधनावित्तहीना' इत्यादि ।

अथ राजपुत्रैस्सानन्दमुक्त—'सर्व श्रुतवन्तस्सुखिनोवयं । सिद्ध नस्समीहित' । विष्णुशर्मोवाच—'एतावता भवतामभिलाषित सपन्न । अपरमपीदमस्तु ।

मित्र प्राप्नुतसज्जना जनपदैर्लक्ष्मी स्समालब्यतां
भूपाला परिपालयन्तु वसुधां शश्वत् स्वधर्मेस्थिता ।
आस्ता मानसतुष्टये सुकृतिना नीतिर्नवो ढेवव
कल्याण कुरुता जनस्य भगवाश्चन्द्रार्ध चूडामणि·' ॥

॥ इति मित्रलाभस्समाप्तः ॥

—(*):—

॥ अथ श्रीरामोदत. ॥

— * —

श्रीपति प्रणिपत्याह श्रीवत्साकितवक्षस ।
श्रीरामोदतमाख्यास्ये श्रीवाल्मीकिप्रकीर्तित ॥ १ ॥
पुरा विश्रवसः पुत्रो रावणो नाम राक्षस. ।
आसीदस्यानुजौ चास्ता कुभकर्णबिभीषणौ ॥ २ ॥
